# कृष्ण गायत्री

ॐ देवकीनन्दनाय विद्महे वासुदेवाय धीमहि
तन्नो कृष्णः प्रचोदयात् ॥

## Krishna Gayatri

Om devakinandanaaya vidmahe vaasudevaaya dhimahi
Tanno Krishna prachodayaat

## Saadhaka Ke Svara

Karo rakshaa vipatti se,
na aisi praarthanaa meri
Vipata se bhaya nahi paaun,
prabhu yaha praarthana meri

Mile duhkha taapa se shaanti,
na aisi praarthanaa meri
Sabhi duhkha se vijaya paaun,
prabhu yaha praarthanaa meri

Madada para koi aa jaave,
na aisi praarthanaa meri
Na tute aatma bala dori,
prabhu yaha praarthanaa meri

Uthaa le bhaara tu meraa,
na aisi praarthanaa meri
Banun samaratha uthaane mei,
prabhu yaha praarthanaa meri

Barhe dhana dhaanya parivaaraa,
na aisi praarthanaa meri
Rahum samabhaavi santoshi,
prabhu yaha praarthanaa meri

Mile mantra tantra ki siddhi,
na aisi praarthanaa meri
Khile bhakti se shakti vaha,
prabhu yaha praarthanaa meri

Sukhi dina mei bhajun tujhako
duhkhi andheri raatri mei
Na aave tuma prati shankaa,
prabhu yaha praarthanaa meri

## साधक के स्वर

करो रक्षा विपत्ति से, न ऐसी प्रार्थना मेरी;
विपत से भय नहीं पाऊँ, प्रभु यह प्रार्थना मेरी।

मिले दुःख ताप से शान्ति, न ऐसी प्रार्थना मेरी;
सभी दुःख से विजय पाऊँ, प्रभु यह प्रार्थना मेरी।

मदद पर कोई आ जावे, न ऐसी प्रार्थना मेरी;
न टूटे आत्म बल डोरी, प्रभु यह प्रार्थना मेरी।

उठा ले भार तू मेरा, न ऐसी प्रार्थना मेरी;
बनूँ समरथ उठाने में, प्रभु यह प्रार्थना मेरी।

बढ़े धन धान्य परिवारा, न ऐसी प्रार्थना मेरी;
रहूँ समभावी संतोषी, प्रभु यह प्रार्थना मेरी।

मिले मंत्र तंत्र की सिद्धि, न ऐसी प्रार्थना मेरी;
खिले भक्ति से शक्ति वह, प्रभु यह प्रार्थना मेरी।

सुखी दिन में भजुं तुझको दुःखी अंधेरी रात्रि में;
न आवे तुम प्रति शंका, प्रभु यह प्रार्थना मेरी।

# अच्युताष्टकम्

अच्युतं केशवं रामनारायणं
कृष्णदामोदरं वासुदेवं हरिम्।
श्रीधरं माधवं गोपिकावल्लभं
जानकीनायकं रामचन्द्रं भजे ॥ १ ॥

अच्युतं केशवं सत्यभामाधवं
माधवं श्रीधरं राधिकाराधितम्।
इन्दिरामन्दिरं चेतसा सुन्दरं
देवकीनन्दनं नन्दजं सन्दधे ॥ 2 ॥

विष्णवे जिष्णवे शंखिने चक्रिणे
रुक्मिणीरागिणे जानकीजानये।
वल्लवीवल्लभायार्चितायात्मने
कंसविध्वंसिने वंशिने ते नमः ॥ 3 ॥

कृष्ण गोविन्द हे राम नारायण
श्रीपते वासुदेवाजित श्रीनिधे।
अच्युतानन्त हे माधवाधोक्षज
द्वारकानायक द्रौपदीरक्षक ॥ 4 ॥

राक्षसक्षोभितः सीतया शोभितो
दण्डकारण्यभूपुण्यताकारणः।
लक्ष्मणेनान्वितो वानरैः सेवितो-
ऽगस्त्यसम्पूजितो राघवः पातु माम् ॥ 5 ॥

धेनुकारिष्टकानिष्टकृद्द्वेषिहा
केशिहा कंसहृद्वंशिकावादकः।
पूतनाकोपकः सूरजाखेलनो
बालगोपालकः पातु मां सर्वदा ॥ 6 ॥

विद्युदुद्योतवत्प्रस्फुरद्वाससं
प्रावृडम्भोदवत्प्रोल्लसद्विग्रहम्।
वन्यया मालया शोभितोरःस्थलं
लोहितांघ्रिद्वयं वारिजाक्षं भजे ॥ 7 ॥

कुञ्चितैः कुन्तलैर्भ्राजमानाननं
रत्नमौलिं लसत्कुण्डलं गण्डयोः।
हारकेयूरकं कंकणप्रोज्ज्वलं
किंकिणीमञ्जुलं श्यामलं तं भजे ॥ 8 ॥

## Achyutāṣṭakam

Achyutaṃ keśāvaṃ rāmanārāyaṇaṃ
Kṛṣṇadāmodaraṃ vāsudevaṃ harim.
Śrīdharaṃ mādhavaṃ gopikāvallabhaṃ
Jānakīnāyakaṃ rāmachandraṃ bhaje.

Achyutaṃ keśavaṃ satyabhāmādhavaṃ
Mādhavaṃ śrīdharaṃ rādhikārādhitam.
Indirāmandiraṃ chetasā sundaraṃ
Devakīnandanaṃ nandajaṃ sandadhe.

Viṣṇave jiṣṇave śaṅkhine chakriṇe
Rukmiṇīrāgiṇe jānakījānaye.
Vallavīvallabhāyārchitāyātmane
Kaṃsavidhvaṃsine vaṃśine te namaḥ.

Kṛṣṇa govinda he rāma nārāyaṇa
Śrīpate vāsudevājita śrīnidhe.
Achyutānanta he mādhavādhokṣaja
Dvārakānāyaka draupadīrakṣaka.

Rākṣasakṣobhitaḥ sītayā śobhito
Daṇḍakāraṇyabhūpuṇyatākāraṇaḥ.
Lakṣmaṇenānvito vānaraiḥ sevito-
'Gastyasampūjito rāghavaḥ pātu mām.

Dhenukāriṣṭakāniṣṭakṛddveṣihā
Keśihā kaṃsahṛdvaṃśikāvādakaḥ.
Pūtanākopakaḥ sūrajākhelano
Bālagopālakaḥ pātu māṃ sarvadā.

Vidyududyotavatprasphuradvāsasaṃ
Prāvṛḍambhodavatprollasadvigraham.
Vanyayā mālayā śobhitoraḥsthalaṃ
Lohitāṅghridvayaṃ vārijākṣaṃ bhaje.

Kuñchitaiḥ kuntalairbhrājamānānanaṃ
Ratnamauliṃ lasatkuṇḍalaṃ gaṇḍayoḥ.
Hārakeyūrakaṃ kaṅkaṇaprojjvalaṃ
Kiṅkiṇīmañjulaṃ śyāmalaṃ taṃ bhaje.

# मधुराष्टकम्

अधरं मधुरं वदनं मधुरं नयनं मधुरं हसितं मधुरम्।
हृदयं मधुरं गमनं मधुरं मधुराधिपतेरखिलं मधुरम् ॥ 1 ॥

वसनं मधुरं चरितं मधुरं वचनं मधुरं वलितं मधुरम्।
चलितं मधुरं भ्रमितं मधुरं मधुराधिपतेरखिलं मधुरम् ॥ 2 ॥

वेणुर्मधुरो रेणुर्मधुरः पाणिर्मधुरः पादौ मधुरौ।
नृत्यं मधुरं सख्यं मधुरं मधुराधिपतेरखिलं मधुरम् ॥ 3 ॥

गीतं मधुरं पीतं मधुरं भुक्तं मधुरं सुप्तं मधुरम्।
रूपं मधुरं तिलकं मधुरं मधुराधिपतेरखिलं मधुरम् ॥ 4 ॥

करणं मधुरं तरणं मधुरं हरणं मधुरं रमणं मधुरम्।
वमितं मधुरं शमितं मधुरं मधुराधिपतेरखिलं मधुरम् ॥ 5 ॥

गुञ्जा मधुरा माला मधुरा यमुना मधुरा वीची मधुरा।
सलिलं मधुरं कमलं मधुरं मधुराधिपतेरखिलं मधुरम् ॥ 6 ॥

गोपी मधुरा लीला मधुरा राधा मधुरा मिलनं मधुरम्।
दृष्टं मधुरं शिष्टं मधुरं मधुराधिपतेरखिलं मधुरम् ॥ 7 ॥

गोपा मधुरा गावो मधुरा यष्टिर्मधुरा सृष्टिर्मधुरा।
दलितं मधुरं फलितं मधुरं मधुराधिपतेरखिलं मधुरम् ॥ 8 ॥

# Madhurāṣṭakam

1. Adharaṃ madhuraṃ vadanaṃ madhuraṃ
   Nayanaṃ madhuraṃ hasitaṃ madhuram.
   Hṛdayaṃ madhuraṃ gamanaṃ madhuraṃ
   Madhurādhipaterakhilaṃ madhuram.
2. Vasanaṃ madhuraṃ charitaṃ madhuraṃ
   Vachanaṃ madhuraṃ valitaṃ madhuram.
   Chalitaṃ madhuraṃ bhramitaṃ madhuraṃ
   Madhurādhipaterakhilaṃ madhuram.
3. Veṇurmadhuro reṇurmadhuraḥ
   Pāṇirmadhuraḥ pādau madhurau.
   Nṛtyaṃ madhuraṃ sakhyaṃ madhuraṃ
   Madhurādhipaterakhilaṃ madhuram.
4. Gītaṃ madhuraṃ pītaṃ madhuraṃ
   Bhuktaṃ madhuraṃ suptaṃ madhuram.
   Rūpam madhuraṃ tilakaṃ madhuraṃ
   Madhurādhipaterakhilaṃ madhuram.
5. Karaṇaṃ madhuraṃ taraṇaṃ madhuraṃ
   Haraṇaṃ madhuraṃ ramaṇaṃ madhuram.
   Vamitaṃ madhuraṃ śamitaṃ madhuraṃ
   Madhurādhipaterakhilaṃ madhuram.
6. Guñjā madhurā mālā madhurā
   Yamunā madhurā vīchī madhurā.
   Salilaṃ madhuraṃ kamalaṃ madhuraṃ
   Madhurādhipaterakhilaṃ madhuram.
7. Gopī madhurā līlā madhurā
   Rādhā madhurā milanaṃ madhuram.
   Dṛṣṭaṃ madhuraṃ śiṣṭaṃ madhuraṃ
   Madhurādhipaterakhilaṃ madhuram.
8. Gopā madhurā gāvo madhurā
   Yaṣṭirmadhurā sṛṣṭirmadhurā.
   Dalitaṃ madhuraṃ phalitaṃ madhuraṃ
   Madhurādhipaterakhilaṃ madhuram.

## हरि नाम ही सहारा है

गोविन्द मेरी यह प्रार्थना है-
भूलूँ न मैं नाम कभी तुम्हारा ।
ये नाम तेरे दिन रात गाऊँ-
गोविन्द दामोदर माधवेति ॥
हे कृष्ण, हे यादव, हे सखेति ॥

देहान्त काले तुम सामने हो,
वंशी बजाते मन को लुभाते ।
गाते यही नाम तन नाथ! त्यागूँ-
गोविन्द दामोदर माधवेति ॥
हे कृष्ण, हे यादव, हे सखेति ॥

प्यारे जरा तो मन में विचारो,
क्या साथ लाये अरु ले चलोगे ?
जाये यही साथ सदा तुम्हारे,
गोविन्द दामोदर माधवेति ॥
हे कृष्ण, हे यादव, हे सखेति ॥

नारी धरा-धाम सुपुत्र प्यारे,
कलत्र सद्बांधव मित्र सारे ।
कोई न साथी हरि को पुकारो-
गोविन्द दामोदर माधवेति ॥
हे कृष्ण, हे यादव, हे सखेति ॥

नाता भला क्या जग से हमारा
आये यहाँ क्यों कर क्या रहे हैं ?
सोचो विचारो हरि को पुकारो-
गोविन्द दामोदर माधवेति ॥
हे कृष्ण, हे यादव, हे सखेति ॥

सच्चे सखा हैं हरि ही हमारे
माता-पिता शील सुबन्धु प्यारे ।
भूलो न भाई दिन-रात गाओ-
गोविन्द दामोदर माधवेति ॥
हे कृष्ण, हे यादव, हे सखेति ॥

## Meri Praarthanaa

Govinda meri yaha praarthanaa hai
Bhuloo na mai naama kabhi tumhaaraa.
Ye naama tere dina raata gaaun
Govinda daamodara maadhaveti.
He krishna, he yaadava, he sakheti.

Dehaanta kaale tuma saamane ho,
Vanshi bajaate mana ko lubhate.
Gaate yahi naama tana Naatha! tyaagun
Govinda daamodara maadhaveti.
He krishna, he yaadava, he sakheti.

Pyaare jaraa to mana mei vichaaro,
Kyaa saatha laaye aru le chaloge?
Jaaye yahi saatha sadaa tumhaare,
Govinda daamodara maadhaveti.
He krishna, he yaadava, he sakheti.

Naari dharaa-dhaama suputra pyaare,
Kalatra sadbaandhava mitra saare.
Koi na saathi hari ko pukaaro
Govinda daamodara maadhaveti.
He krishna, he yaadava, he sakheti.

Naataa bhalaa kyaa jaga se hamaaraa
Aaye yahaa kyon kara kyaa rahe hai?
Socho vichaaro hari ko pukaaro
Govinda daamodara maadhaveti.
He krishna, he yaadava, he sakheti.

Sachche sakhaa hai hari hi hamaare
Maataa-pitaa shila subandhu pyaare.
Bhulo na bhaai dina-raata gaao
Govinda daamodara maadhaveti.
He krishna, he yaadava, he sakheti.

# देहि पदम्

जय शंखगदाधर नीलकलेवर, पीतपटाम्बर देहि पदम्।
जय चन्दनचर्चित कुण्डलमण्डित कौस्तुभशोभित देहि पदम् ॥ 1 ॥

जय पंकज लोचन मारविमोहन पापविखण्डन देहि पदम्।
जय वेणुनिनादक रासविहारक बंकिम सुन्दर देहि पदम् ॥ 2 ॥

जय धीर धुरन्धर अद्भुत सुन्दर दैवतसेवित देहि पदम्।
जय विश्वविमोहन मानसमोहन संसृतिकारण देहि पदम् ॥ 3 ॥

जय भक्त जनाश्रय नित्य सुधालय अन्तिम बान्धव देहि पदम्।
जय दुर्जयशासन केलिपरायण कालियमर्दन देहि पदम् ॥ 4 ॥

जय नित्य निरामय दीन दयामय चिन्मय माधव देहि पदम्।
जय पामरपावन धर्मपरायण दानवसूदन देहि पदम् ॥ 5 ॥

जय वेद विदांवर गोपवधूप्रिय वृन्दावनधन देहि पदम्।
जय सेवकवत्सल करुणासागर मुरलीमनोहर देहि पदम् ॥ 6 ॥

जय गोकुलभूषण कंसनिषूदन शाश्वत जीवन देहि पदम्।
जय योगपरायण संसृतिवारण ब्रह्म निरंजन देहि पदम् ॥ 7 ॥

**Krishna Gayatri**

Om devakinandanaaya vidmahe vaasudevaaya dhimahi
Tanno Krishna prachodayaat

# Dehi Padam

1. Jaya śaṅkhagadādhara nīlakalevara,
   Pītapaṭāmbara dehi padam.
   Jaya chandanacharchita kuṇḍalamaṇḍita
   Kaustubhaśobhita dehi padam.

2. Jaya paṅkaja lochana māravimohana
   Pāpavikhaṇḍana dehi padam.
   Jaya veṇuninādaka rāsavihāraka
   Baṅkima sundara dehi padam.

3. Jaya dhīra dhurandhara adbhuta sundara
   Daivatasevita dehi padam.
   Jaya viśvavimohana mānasamohana
   Saṃsṛtikāraṇa dehi padam.

4. Jaya bhakta janāśraya nitya sudhālaya
   Antima bāndhava dehi padam.
   Jaya durjayaśāsana keliparāyaṇa
   Kāliyamardana dehi padam.

5. Jaya nitya nirāmaya dīna dayāmaya
   Chinmaya mādhava dehi padam.
   Jaya pāmarapāvana dharmaparāyaṇa
   Dānavasūdana dehi padam.

6. Jaya veda vidāṃvara gopavadhūpriya
   Vṛndāvanadhana dehi padam.
   Jaya sevakavatsala karuṇāsāgara
   Muralīmanohara dehi padam.

7. Jaya gokulabhūṣaṇa kaṃsaniṣūdana
   Śāśvata jīvana dehi padam.
   Jaya yogaparāyaṇa saṃsṛtivāraṇa
   Brahma nirañjana dehi padam.

# गीता-अष्टोत्तर-शत-नामावलिः


1. ॐ श्रीकृष्णाय नमः
2. ॐ कमलानाथाय नमः
3. ॐ वासुदेवाय नमः
4. ॐ सनातनाय नमः
5. ॐ वसुदेवात्मजाय नमः
6. ॐ पुण्याय नमः
7. ॐ लीलामानुषविग्रहाय नमः
8. ॐ श्रीवत्सकौस्तुभधराय नमः
9. ॐ यशोदावत्सलाय नमः
10. ॐ हरये नमः
11. ॐ चतुर्भुजात्तचक्रासिगदा-
शंखाद्युदायुधाय नमः
12. ॐ देवकीनन्दनाय नमः
13. ॐ श्रीशाय नमः
14. ॐ नन्दगोपप्रियात्मजाय नमः
15. ॐ यमुनावेगसंहारिणे नमः
16. ॐ बलभद्रप्रियानुजाय नमः
17. ॐ पूतनाजीवितहराय नमः
18. ॐ शकटासुरभञ्जनाय नमः
19. ॐ नन्दव्रजजनानन्दिने नमः
20. ॐ सच्चिदानन्दविग्रहाय नमः
21. ॐ नवनीतविलिप्तांगाय नमः
22. ॐ नवनीतनटाय नमः
23. ॐ अनघाय नमः
24. ॐ नवनीतनवाहाराय नमः
25. ॐ मुचुकुन्दप्रसादकाय नमः
26. ॐ षोडशस्त्रीसहस्रेशाय नमः
27. ॐ त्रिभंगीमधुराकृतये नमः
28. ॐ शुकवागमृताब्धीन्दवे नमः
29. ॐ गोविन्दाय नमः
30. ॐ योगिनां पत्ये नमः
31. ॐ वत्सवाटचराय नमः
32. ॐ अनन्ताय नमः
33. ॐ धेनुकासुरमर्दनाय नमः
34. ॐ तृणीकृततृणावर्त्ताय नमः
35. ॐ यमलार्जुनभञ्जनाय नमः
36. ॐ उत्तालतालभेत्रे नमः
37. ॐ तमालश्यामलाकृतये नमः
38. ॐ गोपगोपीश्वराय नमः
39. ॐ योगिने नमः
40. ॐ कोटिसूर्यसमप्रभाय नमः
41. ॐ इलापतये नमः
42. ॐ परंज्योतिषे नमः
43. ॐ यादवेन्द्राय नमः
44. ॐ यदूद्वहाय नमः
45. ॐ वनमालिने नमः
46. ॐ पीतवाससे नमः
47. ॐ पारिजातापहारकाय नमः
48. ॐ गोवर्धनाचलोद्धर्त्रे नमः
49. ॐ गोपालाय नमः
50. ॐ सर्वपालकाय नमः
51. ॐ अजाय नमः
52. ॐ निरंजनाय नमः
53. ॐ कामजनकाय नमः
54. ॐ कञ्जलोचनाय नमः
55. ॐ मधुघ्ने नमः
56. ॐ मथुरानाथाय नमः
57. ॐ द्वारकानायकाय नमः
58. ॐ बलिने नमः
59. ॐ वृन्दावनान्तस्संचारिणे नमः
60. ॐ तुलसीदामभूषणाय नमः
61. ॐ स्यमन्तकमणेर्हर्त्रे नमः
62. ॐ नरनारायणात्मकाय नमः
63. ॐ कुब्जाकृष्टाम्बरधराय नमः
64. ॐ मायिने नमः
65. ॐ परमपूरुषाय नमः
66. ॐ मुष्टिकासुर चाणूर
मल्लयुद्धविशारदाय नमः
67. ॐ संसारवैरिणे नमः
68. ॐ कंसारये नमः
69. ॐ मुरारये नमः
70. ॐ नरकान्तकाय नमः
71. ॐ अनादिब्रह्मचारिणे नमः
72. ॐ कृष्णाव्यसनकर्षकाय नमः
73. ॐ शिशुपालशिरश्छेत्रे नमः
74. ॐ दुर्योधनकुलान्तकाय नमः
75. ॐ विदुराक्रूरवरदाय नमः
76. ॐ विश्वरूपप्रदर्शकाय नमः
77. ॐ सत्यवाचे नमः
78. ॐ सत्यसंकल्पाय नमः
79. ॐ सत्यभामारताय नमः
80. ॐ जयिने नमः
81. ॐ सुभद्रापूर्वजाय नमः
82. ॐ विष्णवे नमः
83. ॐ भीष्ममुक्तिप्रदायकाय नमः
84. ॐ जगद्गुरवे नमः
85. ॐ जगन्नाथाय नमः
86. ॐ वेणुनादविशारदाय नमः
87. ॐ वृषभासुरविध्वंसिने नमः
88. ॐ बाणासुरकरान्तकाय नमः
89. ॐ युधिष्ठिरप्रतिष्ठात्रे नमः
90. ॐ बर्हिबर्हावतंसकाय नमः
91. ॐ पार्थसारथये नमः
92. ॐ अव्यक्ताय नमः
93. ॐ गीतामृतमहोदधये नमः
94. ॐ कालीयफणमाणिक्य-
रंजितश्रीपदाम्बुजाय नमः
95. ॐ दामोदराय नमः
96. ॐ यज्ञभोक्त्रे नमः
97. ॐ दानवेन्द्रविनाशकाय नमः
98. ॐ नारायणाय नमः
99. ॐ परब्रह्मणे नमः
100. ॐ पन्नगाशनवाहनाय नमः
101. ॐ जलक्रीडासमासक्त-
गोपीवस्त्रापहारकाय नमः
102. ॐ पुण्यश्लोकाय नमः
103. ॐ तीर्थपादाय नमः
104. ॐ वेदवेद्याय नमः
105. ॐ दयानिधये नमः
106. ॐ सर्वतीर्थात्मकाय नमः
107. ॐ सर्वग्रहरूपिणे नमः
108. ॐ परात्पराय नमः

ॐ शान्तिः शान्तिः शान्तिः ॥



## Śrī-kṛṣṇa-aṣṭottara-śata-nāmāvaliḥ

1. Om śrīkṛṣṇāya namaḥ
2. Om kamalānāthāya namaḥ
3. Om vāsudevāya namaḥ
4. Om sanātanāya namaḥ
5. Om vasudevātmajāya namaḥ
6. Om puṇyāya namaḥ
7. Om līlāmānuṣavigrahāya namaḥ
8. Om śrīvatsakaustubhadharāya namaḥ
9. Om yaśodāvatsalāya namaḥ
10. Om haraye namaḥ
11. Om chaturbhujāttachakrāsigadāśaṅkhādyudāyudhāya namaḥ
12. Om devakīnandanāya namaḥ
13. Om śrīśāya namaḥ
14. Om nandagopapriyātmajāya namaḥ
15. Om yamunāvegasaṃhāriṇe namaḥ
16. Om balabhadrapriyānujāya namaḥ
17. Om pūtanājīvitaharāya namaḥ
18. Om śakaṭāsurabhañjanāya namaḥ
19. Om nandavrajajanānandine namaḥ
20. Om sachchidānandavigrahāya namaḥ
21. Om navanītaviliptāṅgāya namaḥ
22. Om navanītanaṭāya namaḥ
23. Om anaghāya namaḥ
24. Om navanītanavāhārāya namaḥ
25. Om muchukundaprasādakāya namaḥ
26. Om ṣoḍaśastrīsahastreśāya namaḥ
27. Om tribhaṅgīmadhurākṛtaye namaḥ
28. Om śukavāgamṛtābdhīndave namaḥ
29. Om govindāya namaḥ
30. Om yogināṃ patye namaḥ
31. Om vatsavāṭacharāya namaḥ
32. Om anantāya namaḥ
33. Om dhenukāsuramardanāya namaḥ
34. Om tṛṇīkṛtatṛṇāvartāya namaḥ
35. Om yamalārjunabhañjanāya namaḥ
36. Om uttālatālabhettre namaḥ
37. Om tamālaśyāmalākṛtaye namaḥ
38. Om gopagopīśvarāya namaḥ
39. Om yogine namaḥ
40. Om koṭisūryasamaprabhāya namaḥ
41. Om ilāpataye namaḥ
42. Om parañjyotiṣe namaḥ
43. Om yādavendrāya namaḥ
44. Om yadūdvahāya namaḥ
45. Om vanamāline namaḥ
46. Om pītavāsase namaḥ
47. Om pārijātāpahārakāya namaḥ
48. Om govardhanāchaloddhartre namaḥ
49. Om gopālāya namaḥ
50. Om sarvapālakāya namaḥ
51. Om ajāya namaḥ
52. Om nirañjanāya namaḥ
53. Om kāmajanakāya namaḥ
54. Om kañjalochanāya namaḥ
55. Om madhughne namaḥ
56. Om mathurānāthāya namaḥ
57. Om dvārakānāyakāya namaḥ
58. Om baline namaḥ
59. Om vṛndāvanāntassañchāriṇe namaḥ
60. Om tulasīdāmabhūṣaṇāya namaḥ
61. Om syamantakamaṇerhartre namaḥ
62. Om naranārāyaṇātmakāya namaḥ
63. Om kubjākṛṣṭāmbaradharāya namaḥ
64. Om māyine namaḥ
65. Om paramapūruṣāya namaḥ
66. Om muṣṭikāsura chāṇūra mallayuddhaviśāradāya namaḥ
67. Om saṃsāravairiṇe namaḥ
68. Om kaṃsāraye namaḥ
69. Om murāraye namaḥ
70. Om narakāntakāya namaḥ
71. Om anādibrahmachāriṇe namaḥ
72. Om kṛṣṇāvyasanakarṣakāya namaḥ
73. Om śiśupālaśiraśchhetre namaḥ
74. Om duryodhanakulāntakāya namaḥ
75. Om vidurākrūravaradāya namaḥ
76. Om viśvarūpapradarśakāya namaḥ
77. Om satyavāche namaḥ
78. Om satyasaṅkalpāya namaḥ
79. Om satyabhāmāratāya namaḥ
80. Om jayine namaḥ
81. Om subhadrāpūrvajāya namaḥ
82. Om viṣṇave namaḥ
83. Om bhīṣmamuktipradāyakāya namaḥ
84. Om jagadgurave namaḥ
85. Om jagannāthāya namaḥ
86. Om veṇunādaviśāradāya namaḥ
87. Om vṛṣabhāsuravidhvaṃsine namaḥ
88. Om bāṇāsurakarāntakāya namaḥ
89. Om yudhiṣṭhirapratiṣṭhātre namaḥ
90. Om barhibarhāvataṃsakāya namaḥ
91. Om pārthasārathaye namaḥ
92. Om avyaktāya namaḥ
93. Om gītāmṛtamahodadhaye namaḥ
94. Om kālīyaphaṇamāṇikyarañjitaśrīpadāmbujāya namaḥ
95. Om dāmodarāya namaḥ
96. Om yajñabhoktre namaḥ
97. Om dānavendravināśakāya namaḥ
98. Om nārāyaṇāya namaḥ
99. Om parabrahmaṇe namaḥ
100. Om pannagāśanavāhanāya namaḥ
101. Om jalakrīḍāsamāsakta-gopīvastrāpahārakāya namaḥ
102. Om puṇyaślokāya namaḥ
103. Om tīrthapādāya namaḥ
104. Om vedavedyāya namaḥ
105. Om dayānidhaye namaḥ
106. Om sarvatīrthātmakāya namaḥ
107. Om sarvagraharūpiṇe namaḥ
108. Om parātparāya namaḥ



# वैदिक शान्ति मन्त्र

ॐ गणानां त्वा गणपतिꣳ हवामहे कविं कवीनामुपमश्रवस्तमम्। ज्येष्ठराजं ब्रह्मणां ब्रह्मणस्पत आ नः शृण्वन्नूतिभिस्सीद-सादनम्। ॐ हंस हंसाय विद्महे परमहंसाय धीमहि। तन्नो हंसः प्रचोदयात्। ॐ नमो हिरण्यबाहवे हिरण्यवर्णाय हिरण्यरूपाय हिरण्यपतये अम्बिकापतये उमापतये पशुपतये नमो नमः॥ ऋतꣳ सत्यं परं ब्रह्म पुरुषं कृष्णपिङ्गलम्। ऊर्ध्व रेतं विरूपाक्षं विश्वरूपाय वै नमो नमः॥ ॐ शान्तिः शान्तिः शान्तिः॥

ॐ नमो ब्रह्मादिभ्यो ब्रह्मविद्यासम्प्रदायकर्तृभ्यो वंशऋषिभ्यो नमो गुरुभ्यः। नारायणं पद्मभवं वसिष्ठं शक्तिं च तत्पुत्रपराशरं च। व्यासं शुकं गौड़पदं महान्तं गोविन्दयोगीन्द्रमथास्यशिष्यम्। श्रीशंकराचार्यमथास्य पद्मपादं च हस्तामलकं च शिष्यम्। तं त्रोटकं वार्तिककारमन्यानस्मत्गुरुम् सन्ततमानतोऽस्मि। श्रुतिस्मृतिपुराणानामालयं करुणालयम्। नमामि भगवत्पादं शंकरं लोकशंकरम्। शंकरं शंकराचार्यं केशवं बादरायणम्। सूत्रभाष्यकृतौ वन्दे भगवन्तौ पुनः पुनः। ईश्वरो गुरुरात्मेति मूर्तिभेदविभागिने। व्योमवद्व्याप्तदेहाय श्री दक्षिणामूर्तये नमः। यस्य देवे पराभक्तिः यथा देवे तथा गुरौ। तस्यैते कथिता ह्यर्था प्रकाशन्ते महात्मनः। ॐ शान्तिः शान्तिः शान्तिः॥

ॐ अग्ने नय सुपथा राये अस्मान् विश्वानि देव वयुनानि विद्वान्। युयोध्यस्मज्जुहुराणमेनो भूयिष्ठां ते नम उक्तिं विधेम। ॐ शान्तिः शान्तिः शान्तिः॥

ॐ पूर्णमदः पूर्णमिदं पूर्णात् पूर्णमुदच्यते। पूर्णस्य पूर्णमादाय पूर्णमेवावशिष्यते। ॐ शान्तिः शान्तिः शान्तिः॥

# Vaidika Śānti Mantra

. Om gaṇānāṃ tvā gaṇapatigvaṃ havāmahe kaviṃ kavīnāmupamaśravastamam. Jyeṣṭharājaṃ brahmaṇāṃ brahmaṇaspata ā naḥ śṛṇvannūtibhissīda sādanam. Om haṃsa haṃsāya vidmahe paramahaṃsāya dhīmahi. Tanno haṃsaḥ prachodayāt. Om namo hiraṇyabāhave hiraṇyavarṇāya hiraṇyarūpāya hiraṇyapataye ambikāpataye umāpataye paśupataye namo namaḥ.

Ṛtagvaṃ satyaṃ paraṃ brahma puruṣaṃ kṛṣṇapiṅgalam. Ūrdhva retaṃ virūpākṣaṃ viśvarūpāya vai namo namaḥ.

Om śāntiḥ śāntiḥ śāntiḥ.

. Om namo brahmādibhyo brahmavidyāsampradāya-kartṛbhyo vaṃśarṣibhyo namo gurubhyaḥ. Nārāyaṇaṃ padmabhavaṃ vasiṣṭhaṃ śaktiṃ cha tatputraparāśaraṃ cha. Vyāsaṃ śukaṃ gauḍapadaṃ mahāntaṃ govinda-yogīndramathāsyaśiṣyam. Śrī śaṅkarāchāryamathāsya padmapādaṃ cha hastāmalakaṃ cha śiṣyam. Taṃ troṭakaṃ vārtikakāramanyānasmatgurum santatamānato'smi. Srutismṛtipurāṇānāmālayaṃ karuṇālayam. Namāmi bhagavatpādaṃ śaṅkaraṃ lokaśaṅkaram. Śaṅkaraṃ śaṅkarāchāryaṃ keśavaṃ bādarāyaṇam. Sūtrabhāṣyakṛtau vande bhagavantau punaḥ punaḥ. Īśvaro gururātmeti mūrttibhedavibhāgine. Vyomavadvyāptadehāya śrī dakṣiṇāmūrttaye namaḥ. Yasya deve parābhaktiḥ yathā deve tathā gurau. Tasyaite kathitā hyarthā prakāśante mahātmanaḥ. Om śāntiḥ śāntiḥ śāntiḥ.

. Om agne naya supathā rāye asmān viśvāni deva vayunāni vidvān. Yuyodhyasmajjuhurāṇameno bhūyiṣṭhāṃ te nama uktiṃ vidhema. Om śāntiḥ śāntiḥ śāntiḥ.

. Om pūrṇamadaḥ pūrṇamidaṃ pūrṇāt pūrṇamudachyate. Pūrṇasya pūrṇamādāya pūrṇamevāvaśiṣyate. Om śāntiḥ śāntiḥ śāntiḥ.

## SHIVA STUTI

Jai shiv shankar, jai gangadhar, karunakar kartaar hare,
Jai kailashi, jai avinashi, sukhrashi, sukhsaar hare,
Jai shashi-shekhar, jai damaru-dhar, jai jai premagaar hare,
Jai tripurari, jai madhaari, amit anant apaar hare,
Nirguna jai jai, saguna anamaya, nirakar, sakaar hare,
Parvati pati, har har shambho, pahi pahi dataar hare ||

Jai rameshwar, jai nageshwar, vaidyanath kedaar hare,
Mallikarjun, somanath jai, mahakal omkaar hare,
Trayambakeshwar, jai ghushmeshwar, bhimeshwar jagtar hare,
Kashi pati, shree vishwanath jai, mangalmay, agha haar hare,
Nilkanth jai, bhutnath jai, mrityunjaya avikaar hare,
Parvati pati, har har shambho, pahi pahi dataar hare ||

Jai mahesh, jai jai bhavesh, jai adhi dev, mahadev vibho,
Kis mukh se he gunateet prabhu, tav apar guna varnan ho
Jai bhavkarak, tarak, harak, patak-darak, shiva shambho,
Din dukhhar, sarva sukhakar, prem sudhakar daya karo,
Par laga do bhavsagar se, ban kar karnadhar hare,
Parvati pati, har har shambho, pahi pahi dataar hare ||

Jai mana bhavan, jai atipavan, shok nashavan shiva shambho,
Vipad vidaran, adham ubaran, satya sanatan shiva shambho,
Sahaj vachan har, jalaj nayan var, dhaval varan tan shiva shambho,
Madan kadan kar paap haran har, charan manan dhan shiva shambho,
Vivasan, vishwarupa, pralayankar, jag ke muladhar hare,
Parvati pati, har har shambho, pahi pahi dataar hare ||

## शिव स्तुति

जय शिवशंकर, जय गंगाधर, करुणाकर करतार हरे,
जय कैलाशी, जय अविनाशी, सुखराशी, सुख-सार हरे,
जय शशि-शेखर, जय डमरू-धर, जय जय प्रेमागार हरे,
जय त्रिपुरारी, जय मदहारी, अमित अनन्त अपार हरे,
निर्गुण जय जय, सगुण अनामय, निराकार, साकार हरे,
पारवती पति, हर हर शम्भो, पाहि पाहि दातार हरे ॥ 1 ॥

जय रामेश्वर, जय नागेश्वर, वैद्यनाथ केदार हरे,
मल्लिकार्जुन, सोमनाथ जय, महाकाल ओंकार हरे,
त्र्यम्बकेश्वर, जय घुश्मेश्वर, भीमेश्वर जगतार हरे,
काशीपति, श्री विश्वनाथ जय, मंगलमय, अघ हार हरे,
नीलकण्ठ जय, भूतनाथ जय, मृत्युंजय अविकार हरे,
पारवती पति, हर हर शम्भो, पाहि पाहि दातार हरे ॥ 2 ॥

जय महेश, जय जय भवेश, जय आदि देव, महादेव विभो,
किस मुख से हे गुणातीत प्रभु, तव अपार गुण वर्णन हो,
जय भवकारक, तारक, हारक, पातक-दारक, शिव शम्भो,
दीन दुःखहर, सर्व सुखाकर, प्रेम सुधाकर दया करो,
पार लगा दो भवसागर से, बनकर कर्णाधार हरे,
पारवती पति, हर हर शम्भो, पाहि पाहि दातार हरे ॥ 3 ॥

जय मन भावन, जय अतिपावन, शोक नशावन शिव शम्भो,
विपद विदारन, अधम उबारन, सत्य सनातन शिव शम्भो,
सहज वचन हर, जलज नयन वर, धवल वरन तन शिव शम्भो,
मदन कदन कर पाप हरन हर, चरन मनन धन शिव शम्भो,
विवसन, विश्वरूप, प्रलयंकर, जग के मूलाधार हरे,
पारवती पति, हर हर शम्भो, पाहि पाहि दातार हरे ॥ 4 ॥